शास्त्री-I खण्ड साहित्यम्

अभिज्ञानशाकुन्तलम्

सप्तमोऽङ्कः

प्र० (1) - एवमाश्रमविरुद्धवृत्तिना संयमः किमिति जन्मतस्त्वया ।
सत्वसंश्रयसुखोऽपि दूष्यते कृष्णसर्पशिशुनेव चन्दनम् ॥

उत्तरम्:- प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य अभिज्ञानशाकुन्तलम् नाट्य शास्त्रस्य सप्तमोऽङ्कात् उद्धृतोऽस्ति ।

अस्मिन श्लोके तपस्विन्या बालकवत् केसरिकिशोरकं मोचयितुं अभ्यर्थितो राजा दुष्यन्तः शिशोः समीपं गत्वा सस्मितं ब्रूते - एवं = अनेन प्रकारेण सिंहं शिशुपीडनादिना आश्रमविरुद्धवृत्तिना - आश्रमस्य = तपोवनस्य विरुद्धा = प्रतिकूला वृत्तिः = व्यापारो यस्य स तादृशेन आश्रमविपरीताचारेण त्वया = बालेन जन्मतः = जन्मन आरभ्य सत्वसंश्रयसुखोऽपि सुखयतीति सुखः, सत्वानां संश्रयेण सुखः सत्वसंश्रयसुखः यद्वा सत्वस्य संश्रयः सत्वसंश्रयश्चासौ सुखश्चेति सत्वसंश्रयसुखः = सकलजीवाभयदानस्पृहणीयः संयमः = अहिंसादिनियमः आत्मदमनम्, कृष्णसर्पशिशुना - कृष्णसर्पस्य शिशुना = शावकेन उद्दीप्तगरलजातीयकृष्णसर्प - बालकेन चन्दनमिव तदाख्यो गन्धवृक्षमिव किमिति = कुतो नु कथं, दूष्यते = कलुषी क्रियते ।

अत्रोपमानुप्रासावलङ्कारौ स्वागता वृत्तञ्च ।

Renu Devi
10/12/20

राधा उमाकान्त सं० महावि० सुखसेना,
पूर्णिया ।

उपशास्त्री-I खण्ड साहित्यम्

रघुवंश महाकाव्यम्

द्वितीयः सर्गः

प्र० (1) इति प्रगल्भं पुरुषाधिराजो मृगाधिराजस्य वचो निशम्य। प्रत्याहतास्त्रो गिरिशप्रभावादात्मन्यवज्ञां शिथिलीचकार॥

उत्तरम् = प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि कालिदास विरचितः रघुवंशमहाकाव्यस्य द्वितीय सर्गात् उद्धृतोऽस्ति। अस्मिन् श्लोके सिंहं राजा दिलीपं प्रत्युवाच- राजा दिलीपः सिंहस्य वचो निशम्य ब्रह्मादिरप्यनुलङ्घ्यशासनस्य भगवतो महेश्वरस्य प्रभावादेव मे बाहुस्तम्भो जातः, न पुनरेतस्य पशोः केशरिण इति सिंह वचसा विज्ञाय स्वापमान भावं तत्याज।

व्याख्या:- पुरुषाधिराजः = नराधीश्वरो राजा दिलीपः, मृगाधिराजस्य = मृगेन्द्रस्य केशरिणः, इति = इत्थम्, प्रगल्भं = विस्पष्टम्, वचः = वाक्यम्, निशम्य = श्रुत्वा, गिरिशप्रभावात् = महेश्वर महिम्नः, प्रत्याहतास्त्र कुण्ठित शस्त्रः, आत्मनि = विषये, अवज्ञां = गर्हणाम। शिथिलीचकार = तत्याज।

Renu Devi
10/12/20

राध्या उमाकान्त सं० महावि० सुखसेना पूर्णिया।

शास्त्री-II खण्ड साहित्यम्

रघुवंश महाकाव्यम्

त्रयोदशः सर्गः

प्र० (1)- वीरासनैर्ध्यानजुषामृषीणाममी समध्यासितवेदिमध्याः।
निवातनिष्कम्पतया विभान्ति योगाधिरूढा इव शाखिनोऽपि॥

उत्तरम्- प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंश महाकाव्यस्य त्रयोदशसर्गात् उद्धृतोऽस्ति। अस्मिन् श्लोके श्रीरामः सीतां प्रति कथयति-

व्याख्याः- प्रिये! वीरासनैः = आसनविशेषैः। ध्यानजुषाम् = ध्यानवताम्। ऋषीणाम् = मुनीनाम्। समध्यासितवेदिमध्याः = समाधिरूढवेदिमध्यभागाः। अमी = एते। शाखिनोऽपि = विटपिनो वृक्षा अपि। निवातनिष्कम्पतया = पवनशून्यस्थानेऽचञ्चलतया। योगाधिरूढा इव = योगाभ्यासरता इव। विभान्ति = शोभन्ते।

भावार्थः- प्रिये! वीरासनेन ध्यानं कुर्वतां निश्चलाङ्गानां मुनीनाम् आश्रमवेदिमध्यवर्तिनोऽमी वृक्षा अपि वातोपद्रवराहित्येन निश्चलतया योगाभ्यासिन इव लक्ष्यन्ते। अर्थात् तपस्विनामेतेषां संसर्गाद् एषु तरुष्वपि तपस्विगुणाः समायाताः। वीरासन लक्षणं तु - "एकपादमथैकस्मिन् विन्यस्योरुणि संस्थितम्।
इतरस्मिंस्तथा चान्यं वीरासनमुदाहृतम्॥

गरुडपुराणे तु -
उत्थितस्तु दिवा तिष्ठेद् उपविष्टस्तथा निशि।
एतद् वीरासनं प्रोक्तं महापातकनाशनम्॥

Ritu Devi
10/12/20
छात्रा उमाकान्त सं० महावि० सुखसेना
पूर्णिया।

उपशास्त्री - प्रखण्ड साहित्यम्

रघुवंश महाकाव्यम्
द्वितीयसर्गः

प्र० 1 भवानपीदं परवानवैति महान् हि यत्नस्तव देवदारौ ।
स्थातुं नियोक्तुर्न हि शक्यमग्रे विनाश्य रक्ष्यं स्वयमक्षतेन ॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंश महाकाव्यस्य द्वितीयसर्गात् उद्धृतोऽस्ति।

अस्मिन् श्लोके राजादिलीपः सिंहं प्रति कथयति - ननु सिंह! अहमिव भवानपि पराधीनः, अहं गोरक्षणे नियुक्तश्चेत् त्वमपि देवदारुसंरक्षणे नियुक्तः इति देवदारुं यत्नेन रक्षसीति समुचितमेतत् । स्वामिनः समक्षं तदीयं वस्तु विनाश्य स्वमक्षशरीरः सेवकः लज्जासङ्कोचाभ्यामभिभूतः सन् स्थातुं नैव वारयेत् । अतोऽहमिमां धेनुं विनाश्य कथं तत्पुरतो व्रजामि ?

व्याख्या :- परवान् = पराधीनः, भवानपि = श्रीमानपि, इदम् = कर्तव्यगुरुत्वम्, अवैति = जानाति, हि = अतः, तव = भवत, देवदारौ = देवदारुतरुरक्षणे, महान् = भूयान्, यत्नः = पर्यवेक्षणप्रयासो विभाव्यते, रक्ष्यं = रक्षणीयं पालनीयं वा वस्तु, विनाश्य = नाशयित्वा, स्वयम् = आत्मना, अक्षतेन = अव्रणेन, कुशलेन वा, नियोक्तुः = नियोजकस्य स्वामिनः, अग्रे = पुरतः, स्थातुं = सन्निधातुम्, शक्यं = साध्यम्, नहि = नैव ।

Renu Devi
10/12/20

राधा उमाकान्त सं० महावि० सुरवसेना, पूर्णिया ।